# <u>जननी जन्मभूमिश्च</u>

कस्मिंश्चित् ग्रामे काचित् वृद्धा आसीत् । तस्याः चत्वाराः पुत्राः आसन् । ते सर्वे श्रमजीविनः शूराः च ।

एकदा तस्य देशस्य उपरि शत्रूणां आक्रमणं भवति । तदा देशे सर्वत्र युवकान् सैन्ये प्रवेशयन् । वृद्धा ज्येष्टपुत्रं आहूय वदति, “पुत्र, देशरक्षणं अस्माकं कर्तव्यम् । अस्माकं देशः इदानीं विपत्तिकाले अस्ति । अतः भवानपि सैनिकः भवतु, मातृभूमिरक्षणं करोतु” इति । ज्येषटपुत्रः सन्तोषेण मातृवचनं अङ्गीकरोति रणाङ्कणं गच्छति शौर्येण युद्धं करोति । वीरस्वर्गं प्राप्नोति ।

वृद्धा पुत्रस्य मरणं श्रुणोति किन्तु किञ्चिदपि विचलितानि भवति । द्वितीयं पुत्रं युद्धार्थं प्रेषयति । द्वितीयः अपि युद्धे वीरमरणं प्राप्नोति । वृद्धा इदानीमपि न खिन्ना । तृतीयं पुत्रमपि रणरङ्गं प्रेषयति । तृतीयः अपि रणरङ्गे मृतः भवति । इदानीं वृद्धा चिन्तयति चतुर्थं पुत्रमपि रणरङ्गं प्रेषयामि इति ।

तदानीं तत् ग्रामीणाः आगत्य वदन्ति - “मातः भवती वृद्धा अन्तिमकाले भवत्याः सेवार्थं कोपि नास्ति । अपि च भवत्याः वंशोद्धारार्थं एषः एकः एव पुत्रः अवशिष्टः। एतमपि मृत्युमुखं प्रति मा प्रेषयतु” इति । तदा माता वदति- “मदीयानां पुत्राणां अपेक्षया मम जन्मभूमिः एव श्रेष्ठा । जन्मभूमिरक्षणापेक्षया अन्यत् महाकार्यं नास्त्येव” इति। एवं सा चतुर्थं पुत्रमपि रणरङ्गं प्रेषयति ।

रणाङ्कणे घोरं युद्धं प्रवर्तते । अत्र वृद्धायाः तु रात्रौ निद्रा अपि नास्ति । तस्याः एका एव चिन्ता । ‘स्वदेशस्य गतिः का भवेत्’ इति । एकस्मिन् दिने प्रातः एकः ग्रामीणाः आगत्य दुःखेन वदति – “मातः भवत्याः चतुर्थः पुत्रः अपि मृतः” इति । तदा मातुः नयने अश्रुपूर्णे । तदा ग्राणीणः वदति – “मातः वयं तु प्रथमं एव विज्ञापितवन्तः भवती अवशिष्टं एकमेव पुत्रं मा प्रेषयतु इति । किन्तु भवती असमाकं वचनं न श्रुतवती । अधुना च रोदिति” इति । “भोः मम पुत्रः मृतः इति न रोदिमि । किन्तु अधुना युद्धार्थं प्रेषयितुं मम पञ्चमः पुत्रः नास्ति किल, इति रेदिमि । अस्माकं देशस्य का स्थितिः स्यात् इत्येवं मम चिन्ता” इत्युक्तवती वृद्धा । “तद्विषये चिन्ता मास्तु । भवत्याः पुत्राः पञ्चत्वं गताः । किन्तु देशः रक्षितः । विजयलक्ष्मीः अस्माकं पक्षे आलिङ्गितवती । वयं इदानीं विजयशालिनः” इत्युक्तवन्तः ग्रामीणाः । एतत् श्रुत्वा वृद्धा अतीव सन्तुष्टा अभवत् ।

**“जननी जन्मभूमिश्च स्वर्गादपि गरीयसि”** ।

* * *